9४

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser.

Title : Dirgha Kawacha Stotra

५

V/4

In Complete

Dinghā Kanach Stiliā : **Title**

: Author

: Editor

: Year, Vols.

810 : Publisher

V/4 Presented by Prof. V. R. Trivedi : Remarks

सुलहालिकालोभमारेभः श्री

दुर्गा० १

श्रीगणेशाय नमः॥ श्रीमार्कंडेय उवाच॥ ॥ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृ
णां॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह॥१॥ ब्रह्मोवाच॥ अस्ति गु
ह्यतमं विप्र सर्वभूतोपकारकं॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामु
ने॥२॥ प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी॥ तृतीयं चंद्रघंटेति कूष्मां
डेति चतुर्थकं॥३॥ पंचमं स्कंदमातेति षष्ठं कात्यायनीति च॥ सप्तमं का
लरात्री च महागौरीति चाष्टमं॥४॥ नवमं सिद्धिदाः प्रोक्ता नव दुर्गाः
प्रकीर्तिताः॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना॥५॥ अग्नि
ना दह्यमानस्तु शत्रुमध्ये गतो रणे॥ विषमे दुर्गमे चैव भयार्ताः शर
णं गताः॥६॥ न तेषां जायते किंचिदशुभं रणसंकटे॥ नापदं तस्य पश्या १
मि शोकदुःखभयं न हि॥७॥ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्र

जायते॥ प्रेतसंस्था तु चामुंडा वाराही महिषासना॥८॥ ऐंद्री गजसमारू
ढा वैष्णवी गरुडासना॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहनी॥
९॥ ब्राह्मी हंससमारूढा सर्वाभरणभूषिता॥ नानाभरणशोभाढ्या ना
नारत्नोपशोभिता॥१०॥ दृश्यंते रथमारूढा देव्याः क्रोधसमाकुलाः॥
शंखं चक्रं गदां शक्तिं हलं च मुसलायुधं॥११॥ खेटकं तोमरं चैव परशुं
पाशमेव च॥ कुंतायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं॥१२॥ दैत्यानां देहना
शाय भक्तानामभयाय च॥ धारयंत्यायुधानीत्थं देवानां च हिताय वै॥१३॥
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया॥ श्वेतरूपधरा देवी ईश्वरी
वृषवाहना॥१४॥ इत्येता मातरः सर्वाः सर्वायुधसमन्विताः॥ नमस्तेस्तु
महारौद्रे महाघोरपराक्रमे॥१५॥ महाबले महोत्साहे महाभयवि

प्राच्यांरक्षतुमा
मैंद्री

नाशिनी॥ त्राहि मां देवि दुःप्रेक्ष्ये शत्रूणां भयवर्धिनी॥१६॥ [illegible]
[illegible] आग्नेय्यामग्निदेवता॥ दक्षिणे रक्षवाराही नैर्ऋत्यां खड्गधारिणी
॥१७॥ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी॥ उदीच्यां रक्ष कौमारी
ईशान्यां शूलधारिणी॥१८॥ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी त
था॥ एवं दश दिशो रक्षेच्चामुंडा शववाहना॥१९॥ जया मे चाग्रतः स्थातु
विजया स्थातु पृष्ठतः॥ अजिता वामपार्श्वे तु दक्षिणे चापराजिता॥२०॥
शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता॥ मालाधरि ललाटे
च भ्रुवौ रक्षेद्यशस्विनी॥२१॥ त्रिनेत्रा च भ्रुवोर्मध्ये यमघंटा च ना
सिके॥ शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी॥२२॥ कपोलौ
कालिका रक्षेत्कर्णमूले च शांकरी॥ नासिकायां सुगंधा च उत्तरोष्ठे

च चर्चिका॥२३॥ अधरे चामृतकला जिह्वायां च सरस्वती॥ दंतान्रक्ष
तु कौमारी कंठमध्ये तु चंडिका॥२४॥ घंटिकां चित्रघंटा च महामाया च ता
लुके॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला॥२५॥ ग्रीवायां भद्रकाली
च पृष्ठवंशे धनुर्धरी॥ नीलग्रीवा बहिःकंठे नलिकां नलकूबरी॥२६॥ ख
ड्गधारिण्युभौ स्कंधौ बाहू मे वज्रधारिणी॥ हस्तयोर्दंडिनी रक्षेदंबि
का चांगुलीषु च॥२७॥ नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी॥
स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी॥२८॥ हृदये ललितादेवी उ
दरे शूलधारिणी॥ नाभिं च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा॥२९॥ पू
तना कामिका मेढ्रं गुदे महिषवाहिनी॥ कट्यां भगवती रक्षेज्जानुनी वि

ध्यवासिनी ॥ ३० ॥ जंघे महाबला प्रोक्ता जानुमध्ये विनायकी । गुल्फयोर्ना
रसिंही च पादपृष्ठे च तैजसी ॥ ३१ ॥ पादांगुलीः श्रीधरी च पादाधस्त
लवासिनि । दंष्ट्राः करालिनी रक्षेत्केशांश्चैवोर्द्धकेशिनि ॥ ३२ ॥ रोमकूपा
णि कौबेरी त्वचं वागेश्वरी तथा । रक्तमज्जावसामांसान्यस्थिमेदांसि पा
र्वती ॥ ३३ ॥ अंत्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी । पद्मावती पद्म
कोशे कफे चूडामणिस्तथा ॥ ३४ ॥ ज्वालामुखी नखज्वालामभेद्या सर्व ॥३॥
संधिषु । शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ॥ ३५ ॥ अहंकारं म

नो बुद्धिं रक्ष मे धर्मधारिणि । प्राणापानौ तथा व्यानमुदानं च समानकं ॥ ३६ ॥
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना । यशः कीर्तिं च लक्ष्मीं च सदा र
क्षंतु मातरः ॥ ३७ ॥ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडिके । पुत्रान् रक्षे
न्महालक्ष्मी भार्यां रक्षतु भैरवी ॥ ३८ ॥ मार्गं क्षेमकरी रक्षेद्विजयः सर्व
तः स्थिता । रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥ ३९ ॥ तत्सर्वं रक्ष मे देवि ज
यंती पापनाशिनि । पदमेकं न गच्छेत्स यदीच्छेच्छुभमात्मनः ॥ ४० ॥ कवचेना
वृतो नित्यं यत्र यत्र स गच्छति । तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥ ४१ ॥

दुर्गा०
॥७॥

यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं। परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमा
न्॥४२॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः। त्रैलोक्ये तु भवेत्पूज्यः कवचे
नावृतः पुमान्॥४३॥ इदं तु देव्याः कवचं देवानामपि दुर्लभं। यः पठेत्प्रयतो नित्यं
त्रिसंध्यं श्रद्धयान्वितः॥४४॥ दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः॥ जीवे
द्वर्षशतं साग्रमपमृत्युविवर्जितः॥४५॥ नश्यंति व्याधयः सर्वे लूताविस्फो
टकादयः॥ स्थावरं जंगमं चापि कृत्रिमं चापि यद्विषं॥४६॥ अभिचाराणि
सर्वाणि मंत्रयंत्राणि भूतले॥ भूचरा खेचराश्चैव कुलजाश्चोपदेशिकाः॥
॥४७॥ सहजा कुलजा माला डाकिनी शाकिनी तथा। अंतरिक्षचरा घोरा
डाकिन्यश्च महाबलाः॥४८॥ ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः॥
ब्रह्मराक्षसवेतालाः कूष्मांडा भैरवादयः॥४९॥ नश्यंति दर्शनात्त ॥७॥

स्य कवचे हृदि संस्थिते॥ मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परं॥५०॥ यशसा
वर्धते सोऽपि कीर्तिमंडितभूतले॥ जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा॥
५१॥ यावद्भूमंडलं धत्ते सशैलवनकाननं॥ तावत्तिष्ठति मेदिन्यां संततिः पुत्र
पौत्रिकी॥५२॥ देहांते परमं स्थानं यत्सुरैरपि दुर्लभं॥ प्राप्नोति पुरुषो नित्यं
महामायाप्रसादतः॥५३॥ इति कवचं समाप्तम्॥ ॥जयंती मंगला काली भ
द्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥१॥ म
धुकैटभविद्राविविधात्रिवरदे नमः॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥२॥ महिषासुरनिर्नाशिविधात्रीवरदे नमः॥ रूपं०॥३॥ अचिंत्यरूपचरि
ते सर्वशत्रुविनाशिनि॥ रूपं०॥४॥ नतेभ्यः सर्वदा भक्त्या चंडिके दुरितापहे
रूपं०॥५॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि॥ रूपं०॥६॥ चंडिके

दुर्गा०

सततं ये त्वा मर्चयंतीह भक्तितः। रूपं०॥७॥ देहि सौभाग्य मारोग्यं देहि देवि परं
सुखं॥ रूपं॥८॥ विधेहि द्विषतां नाशं विधेहि बल मुच्चकैः। रूपं०॥९॥ विधे
हि देवि कल्याणं विधेहि विपुलां श्रियं॥ रूपं०॥१०॥ सुरासुरशिरोर
त्ननिघृष्टचरणांबिके। रूपं०॥११॥ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कु
रु। रूपं०॥१२॥ प्रचंडदैत्यदर्पघ्ने चंडिके दुरितापहे। रूपं०॥१३॥ चतुर्भुजे चतुर्वक्त्र
संस्तुते परमेश्वरी। रूपं०॥१४॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदांबिके। रूपं
०॥१५॥ हिमाचलसुतानाथसंस्तुते परमेश्वरी। रूपं०॥१६॥ इंद्राणीपतिस
द्भावसंस्तुते परमेश्वरी। रूपं०॥१७॥ देवि प्रचंडदोर्दंडदैत्यदर्पविनाशिनि
रूपं०॥१८॥ देवि भक्तजनोद्दामदत्तानंदोदयेंबिके। रूपं०॥१९॥ पत्नीं मनो
रमां देहि मनोवृत्तानुसारिणीं। तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां॥२०॥

५

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः। स तु सप्तशती संख्या वरमाप्नोति
संपदां॥२१॥ इत्यर्गलास्तुतिः॥ ॥ विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे॥१॥ सर्वमेतद्विना यस्तु मंत्रा
णामपि कीलकं। सोपि क्षेममवाप्नोति सततं जाप्यतत्परः॥२॥ सिध्यंत्युच्चाट
नादीनि वस्तूनि सकलान्यपि। एतेन स्तुवतां देवी स्तोत्रवृंदेन सिध्यति॥३॥ न
मंत्रो नौषधं तत्र न किंचिदपि विद्यते। विना जाप्येन सिध्येत सर्वमुच्चाटनादि
कं॥४॥ समग्राण्यपि सेत्स्यंति लोकशंकामिमां हरः। कृत्वा निमंत्रयामास स
र्वमेवन संशयः॥५॥ स्तोत्रं वै चंडिकायास्तु तच्च गुह्यं चकार सः। समाप्नोय
स पुण्येन तां यथावन्नियंत्रणां॥६॥ सोपि क्षेममवाप्नोति सर्वमेव न संश
यः। कृष्णायां वा चतुर्दश्यां अष्टम्यां वा समाहितः॥७॥ ददाति प्रतिगृह्णाति

नान्यथैषां च सिध्यति। इत्थंरूपेण कीलेन महादेवेन कीलितं ॥ ८ ॥ यो निः
कीलां विधायैनां नित्यं जपति संस्फुटं। स सिद्धः स गणः सोपि गंधर्वो जाय
ते नरः ॥ ९ ॥ न चैवाप्यटतस्तस्य भयं क्वापि न जायते। नापमृत्युवशं याति
मृतो मोक्षमवाप्नुयात् ॥ १० ॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति।
ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किंचिद् दृश्य
ते ललनाजनैः। तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभं ॥ १२ ॥ शनैस्तु ज
प्यमानेस्मिन् स्तोत्रे संपत्तिरुच्चकैः। भवत्येव समग्रापि ततः प्रारभ्यमे
व तत् ॥ १३ ॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः। शत्रुहानिः प
रो मोक्षः स्तूयते ललनाजनैः ॥ १४ ॥ [illegible]गे भव[illegible] कि[illegible]कं समा[illegible]